**आरण्यकम्** (XXVI/1-2) **मार्च-सितम्बर 2018**
**अर्धवार्षिकं सन्दर्भितं संस्कृतशोधपत्रम्**

## संस्कृतप्रसारपरिषद्, आरा
### प्रकाशनम्

1. मेघदूतम् (सभूमिका-हिन्दीपद्यानुवादसहितम्) - स्व. पण्डित कमलाकान्त उपाध्यायः 15 रूप्यकाणि
2. भोजपुरी नीतिसतक (भर्तृहरि 'नीतिशतक'स्य भोजपुरी-पद्यानुवादः) -श्री देवकुमार मिश्रः 'अलमस्त' 15 रूप्यकाणि
3. पण्डित दीनदयाल उपाध्याय के 'एकात्ममानवदर्शन' की मीमांसा - श्री नर्मदेश्वर ओझा 15 रूप्यकाणि
4. माण्डूक्योपनिषद्-'नलिन-भाष्य' - पं. जगदीश्वर प्रसाद मिश्र 'नलिन' 35 रूप्यकाणि
5. भरतचरितम् (महाकाव्यम्) - स्व. भवानीदत्त शर्मा 51 रूप्यकाणि
6. राष्ट्रियता : सांस्कृतिक अवधारणा - श्री नर्मदेश्वर ओझा 51 रूप्यकाणि
7. संस्कृतनिबन्धसञ्चयनम् - पं. व्रजभूषण मिश्र 'आक्रान्तः' 41 रूप्यकाणि
8. ईशावास्योपनिषद् एवं केनोपनिषद्-'नलिन-भाष्य' - श्री जगदीश्वर प्रसाद मिश्र 'नलिन' 51 रूप्यकाणि
9. आध्यात्मिकनिबन्धसंग्रह - श्री जगदीश्वर प्रसाद मिश्र 'नलिन' 51 रूप्यकाणि
10. उपेन्द्रविज्ञानदर्शनम् (वेदान्तग्रन्थः) - स्व. पं. उपेन्द्रनारायणदत्त शर्मा 41 रूप्यकाणि
11. भावनाविलासशतकम् - स्व. पं. उपेन्द्रनारायणदत्त शर्मा 21 रूप्यकाणि
12. हनुमच्चरितम् - स्व. पं. व्रजभूषणमिश्र 'आक्रान्तः' 51 रूप्यकाणि
13. उपनिषदों की भूमिका - पं. जगदीश्वर प्रसाद मिश्र 'नलिन' 51 रूप्यकाणि
14. महाभारतसारसंग्रहः (प्रकाश्यः) - स्व. पण्डित वचन मिश्रः
15. चरितरत्नत्रयी - स्व. पं. व्रजभूषणमिश्र 'आक्रान्तः' 51 रूप्यकाणि
16. जगन्नाथचरितम् - डॉ. बनमाली बिश्वालः 60 रूप्यकाणि
17. कृत्-प्रत्ययविश्लेषण - डॉ. गोपबन्धु मिश्रः 204 रूप्यकाणि

आर.एन.आई. सं.58951/94 ISSN 0975 - 0061

# आरण्यकम्

**अर्धवार्षिकं सन्दर्भितं संस्कृतशोधपत्रम्**

**(Bi-annual Refereed Sanskrit Research Journal)**

**संस्कृतप्रसारपरिषद्**
**आरा (विहारः)**

**षड्विंशं वर्षम्, प्रथमद्वितीयौ अङ्कौ**
**मार्च-सितम्बर 2018**

# 'आरण्यक'स्य नियमाः

1. संस्कृतप्रसारपरिषद्, आरा-पक्षत इदं षाण्मासिकं शोधपत्रं संस्कृतेन चैत्र-आश्विनमासयोः (मार्च-सितम्बर) प्रकाश्यते। वर्षारम्भः चैत्रात् (मार्च तः)मन्यते।
2. ग्राहकत्वं पूर्णवर्षस्यैव स्वीक्रियते। मध्येवर्षं ग्राहकत्वं काङ्क्षतः पूर्णवर्षस्य शुल्कमपेक्ष्यते। तादृशाय ग्राहकाय वर्षस्य पूर्वप्रकाशितोऽङ्क उपलब्धौ सत्यां प्रेषयिष्यते।
3. वार्षिकं शुल्कम् एकशतं (100) रूप्यकाणि। एकस्याङ्कस्य शुल्कम् पञ्चाशत् (50) रूप्यकाणि। शुल्कप्रेषणस्योपायाः-

**(i) NEFT Banking**

Bank - Indian Bank, Ara (Bihar)
IFSC - IDIB000A047
Name - Sanskrit Prasara Parishad
Acc. No. - 552203784

शुल्कं संप्रेष्य तस्य सन्देशसूचना (Message) अत्र देया-
डॉ. नीलमणि पाठकः, दूरभाषः 09431451895,
Email-nilmanipathak19@gmail.com

**( ii ) बैंक ड्राफ्ट 'संस्कृतप्रसारपरिषद्'** इति नाम्ना आरा (बिहार) नगरे व्यवहरणीयम्।
**ड्राफ्ट प्रोषणस्थलम् -** डॉ. नीलमणि पाठकः, गणपति ज्वेलर्स के पीछे, महावीर स्थान, मौलाबाग, आरा (विहार)-802301

**( iii ) धनादेशः** (M.O.) डॉ. नीलमणि पाठकस्य नाम्ना।

4. विमर्शात्मका अनुसन्धानात्मकाश्च शास्त्रीया अप्रकाशितपूर्वा उच्चस्तरीया गम्भीराश्च मौलिका निबन्धाः प्रकाशनाय गृह्यन्ते।
5. काव्य-नाटक-चरित्रवर्णन-व्यङ्ग्य-हास्यसम्बद्धा नव्या रचना अत्र स्थानं न लभन्ते।
6. प्रकाशनाय प्रेषिताः सर्वविधा रचनाः शुद्धा एकस्मिन् पत्रपृष्ठे सुस्पष्टाक्षरैः लिखिताः टङ्किता वा स्युः। रचनाऽन्ते रचयितुः आवाससङ्केतः पदनिर्देशश्च उल्लिखितौ स्याताम्।
7. प्रकाशितसंस्कृतकाव्यनाटकाऽऽलोचनादिग्रन्थानां समीक्षार्थं सम्बद्धग्रन्थस्य प्रतिकृतिद्वयं सम्पादकं प्रति प्रेषणीयम्।
8. लेखकेभ्यः तत्प्रकाशितलेखानां पञ्च प्रतिरूपाण्यपि दीयन्ते।
9. लेखानां प्रकाशनस्य सम्पादनस्य च सर्वाधिकारः सम्पादकाधीनः।
10. 'आरण्यक'सम्बद्धः लेखप्रकाशनसमीक्षादिविषयकः सर्वविधपत्रव्यवहारः **प्रो. गोपबन्धु मिश्रः, अध्यक्षः, संस्कृतविभागः, काशी हिन्दू विश्व-विद्यालयः, वाराणसी-221005 इति सङ्केतेन** दूरभाषः-0542-2310561, (चलः) 09450870788 विधेयः।
Email-gopabandhuh@gmail.com

# फार्म - ४

**नियमः ८ द्रष्टव्यः**

| | | | |
|---|---|---|---|
| 1. | प्रकाशनस्थानम् | : | आरा (विहारः) |
| 2. | प्रकाशनस्य अवधिः | : | अर्धवार्षिकम् |
| 3. | मुद्रकस्य नाम | : | प्रो. गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, आरा |
| 4. | प्रकाशकस्य नाम | : | प्रो. गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम् प्रकाशपुरी, आरा (विहारः) |
| 5. | सम्पादकस्य नाम | : | प्रो. गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम् प्रकाशपुरी, आरा (विहारः) |
| 6. | तेषां जनानां नामानि सङ्केताश्च ये समाचारपत्रस्य स्वामिनः स्युः तथा च ये समस्तव्ययस्य एकप्रतिशतात् अधिकस्य अंशग्राहकाः स्युः | : | संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम् प्रकाशपुरी, आरा (विहारः) |

अहं गोपबन्धु मिश्रः एतद्द्वारा उद्घोषयामि यत् मम अधिकतमस्य बोधस्य विश्वासस्य च अनुसारेण उपरि प्रदत्तं विवरणं सत्यम् अस्ति।

**ह. गोपबन्धु मिश्रः**
सम्पादकः

# आरण्यकम्

संस्कृतप्रसारपरिषदः अर्धवार्षिकी संस्कृतशोधपत्रिका

**वर्षाङ्कौ - षड्विंशं वर्षम्, प्रथमद्वितीयौ अङ्कौ संयुक्ताङ्कः**

**चैत्रः-आश्विनः, वि.सं. २०७५**

**मार्च-सितम्बर, २०१८**

**प्रतिवर्षं प्रकाशनकालः**
**चैत्रः, आश्विनः-विक्रमाब्दः**
**मार्च, सितम्बर**

*प्रत्यङ्कम् - ५० रूप्यकाणि*
*संयुक्ताङ्कः - १०० रूप्यकाणि*
*वार्षिकं शुल्कं १०० रूप्यकाणि*

**परामर्शदात्री समितिः**

डॉ. हरिहर झा, दरभङ्गा
डॉ. उमाशङ्कर शर्मा 'ऋषिः', पटना
डॉ. भागीरथ त्रिपाठी 'वागीशः शास्त्री', वाराणसी
डॉ. राय अश्विनी कुमारः, बोधगया

संस्थापकः
**स्व. पण्डित व्रजभूषण मिश्र 'आक्रान्तः'**

सम्पादकः
**प्रो.गोपबन्धु मिश्रः**
कुलपतिः
श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम् (गुजरात)
भूतपूर्वः अतिथ्यध्यापकः (संस्कृतम्)
सोर्बोन नोवेल विश्वविद्यालयः, पेरिस् (फ्रान्स्)
Email-gopabandhuh@gmail.com

सह-सम्पादकः
**डॉ. सुनीलकुमार प्रधानः**
Email-sunilkumarp435@gmail.com

प्रकाशिका
**संस्कृतप्रसारपरिषद्**
रामेश्वरलीलासदनम्
महावीरस्थानम्
मौलाबाग, आरा (विहारः) 802301

संस्कृतप्रसारपरिषद्, आरा पक्षतः प्रो. गोपबन्धु मिश्रेण, दी महावीर प्रेस, बी.20/44, भेलूपुर, वाराणसी इत्याख्ये मुद्रणालये मुद्रितं प्रकाशितं च।

**प्रो. गोपबन्धु मिश्रः**
सम्पादकः

# सम्पादकीयम्

'न्यायः', 'नयः' इति द्वौ शब्दौ परस्परं सम्बद्धावपि भिन्नार्थकौ एव। नियमेन ईयते इत्यर्थे नि–इण् 'गतौ' धातोः 'परिण्योर्नीणोद्यूताभ्रेषयोः (३१.३.३७) इति सूत्रेण घञि विहिते नि–इ+घञ् = 'न्यायः' इति निष्पद्यते। तत्र अभ्रेषे अर्थे एष शब्दः निष्पद्यते। अभ्रेषः नाम भ्रेषादन्यः। भ्रेषः अर्थात् उचिताद् भ्रशः (भ्रेषे भ्रंशो यथोचितात्, अमरकोषेः २८.२३)। अतः अभ्रेषः अर्थात् स्वरूपाद् अचलनम् ('यथाप्राप्तकरणमभ्रेषः इति तत्त्वबोधिनी', सिद्धान्तकौमुदी, ३.३.३७)। तस्मिन् अभ्रेषे अर्थात् यथाप्राप्त करणे यथोचितकार्यनिर्वृतौ पदार्थानाम् अनपचारे वा अर्थे 'न्याय' शब्दः प्रवर्तते। 'एषोऽत्र न्यायः,उचितम् इत्यर्थः' इति सिद्धान्तकौमुदी (अ.३.३.३७)। न्यायशब्दस्य पर्यायवाचिनः शब्दा अमरकोषे उच्यन्ते, तद्यथा–

**अभ्रेषन्यायकल्पास्तु देशरूपं समञ्जसम्।** (अमर.२.८.२४)

एवं च 'नय' शब्दः 'णीञ्' प्रापणे धातोः भावेऽर्थे एरच् (अ.३.३.५६) इति सूत्रेण अच् प्रत्यये विहिते नी + अच् = 'नय' इति निष्पद्यते। अमरकोषे उक्तमस्ति– 'नयो नाये' (अमर. ३.२.९)

अतः नयनं नयः अर्थात् नीतिः इत्यर्थो बोध्यते।

भिन्नार्थकत्वे सत्यपि कश्चिदपि न्यायः नयं विहाय नैव प्रवर्तेत। किं च जीवने कोऽपि नयः नीतिः रीतिः वा न्यायमुद्दिश्य आचर्यः इति भावदशायाम् उभयोः अन्वय एव सर्वथऽपेक्षितो भवति। यत्र कुत्रापि एतयोः संहत्यभावो दृश्यते अर्थात् नयमार्गं परिहाय न्यायो भवति उत न्यायं तटस्थीकृत्य नयानां निश्चयो भवति तत्र दुष्परिणतिः अनिष्टसङ्गतिर्वा भवत्येव। तद्यथा– एकस्मिन् देशे स्थितानां धर्मविशेषावलम्बिनां कृते आत्मना परिवारगतानां शिशूनां संख्यानिश्चयकाले देशे प्रचाल्यमानायाः तथा च आवश्यक्यतायाः व्यवस्थायाः प्रातिकूल्यम् आचर्य यदि नयः प्रवर्तते, नर्हि अग्रे न्यायकालेऽपि यथाप्राप्तकरणे अभ्रेषे वा अद्वितीयः सर्वेषां कृते समानः न्यायः कर्तुं न शक्यते एव। अतः समानम् उचितं यथाप्राप्तं पक्षपातरहितं न्यायं विधातुं सर्वेषां कृते एकः अनन्यः नयोऽपि आचरणीयो भवेदेव। किं च न्यायविधानकाले व्यष्टिगतपदप्रतिष्ठाधनादिनिरपेक्षतया नयमेव अनुसृत्य प्रवृत्तिः विधेया।

अपरोऽप्येको विषयः। न्यायो भवेत्, किं च न्यायो भवतीति प्रत्यक्षीकरणमपि भवेत्



इति सामान्योक्तिः विद्यते। कस्यचिज्जनस्य विषये नयमाश्रित्य रहसि न्यायः क्रियते चेत्तस्य तु हितमिष्टसिद्धिर्वा भवति, किन्तु एतत् सर्वैः सामान्यैरपरेः प्रत्यक्षं न दृश्यते न ज्ञायते वेति चेत् 'मम कृतेऽपि काले आगते आवश्यकतायाम् आपतितायाम् अवश्यं न्यायो भविष्यति' इत्यात्मविश्वासो न सिद्ध्यति। क्रमशः बहुत्र बहुकालं यावत् एतादृशी आत्मविश्वासहानिः भवति चेत् नयमाश्रित्य प्रवृत्तिः कदाचित् व्याहताऽपि भवितुमर्हति। अत एव न्यायस्य प्रत्यक्षीकरणमपि न्यायकरणमिव महत्त्वपूर्णमिति उक्तं विद्यते। संस्कृतविद्याध्ययनाध्यापनक्षेत्रे ये केचन परमनिष्ठया सेवाभावनया च दत्तप्राणाः सन्ति तथा च समाजस्य पक्षतः धनपदप्रतिष्ठादि अनपेक्ष्यैव ये शास्त्रसंरक्षणविधौ अप्रकाशितहस्तलिखितपाडुलिपिग्रन्थानां सम्पादने प्रकाशने वा दत्तचित्ताः सन्ति अथवा संस्कृतभाषा सर्वत्र व्यवहारभूमौ दृश्यमाना स्यादिति धिया तदर्थं यतमानाः सन्ति, तेषां सर्वेषामपि सपोषणं संवर्धनं सम्माननमवश्यं स्यात् इति एष न्यायः। किं च एष न्यायः क्रियमाणोऽस्तीति सर्वत्र प्रसङ्गः एष समाचारपत्रादिषु इतरेषु वा सञ्चारतन्त्रेषु व्यापकतया स्थानं लभेत। तेन तादृशकर्मणि रतानामुत्साहस्तु वर्धिष्यते तदितराणामपि कृते कश्चिद् विशिष्टः कर्तव्यबोध उद्बुद्धिम् अवाप्नुयात्। सम्पूर्ण भारतवर्षे प्रतिप्रान्तं वैदिकवाङ्मयस्य पाठपारायणादिमुखेन तथा च तद्गतविशिष्टताविमर्शादिद्वारा एवं च विविधशास्त्राणां पारम्परिकरीत्या अध्ययनाध्यापनक्रम इदानीमपि श्रद्धया प्रवर्तमानो विद्यते। तत्र सर्वकारीयव्यवस्था सर्वथा अनुकूला परिपोषयित्री वाऽस्ति इति वक्तुं न शक्यते, किं च बहुत्र तु कापि व्यवस्था नास्त्येव, तथापि मठमन्दिरादीनाम् उत वैयक्तिकार्थिकानुदानादेः साहाय्येन सा पारम्परिकाध्ययनाध्यापनरीतिः प्रचाल्यमाना अस्ति। तेसा कृते सम्यक् संपोषणोपायस्तु करणीय एव, किं च तादृशोयायस्य सर्वत्र सभ्यग् रीत्या प्रचारः प्रकाशनं च भवेत्।

आरण्यकस्य वर्तमानेऽङ्के परिशिष्टतया श्रीमदभिनवगुप्तचार्येण विरचितम् एतावत्पर्यन्तम-प्रकाशितं हस्तलिपिग्रन्थरूपेण स्थितं काव्यं सटीकं डा. बबुआनारायणमिश्रेण सम्पादितं प्रकाश्यते। एतेन व्याजेन, अप्रकाशितग्रन्थः विशेषसम्पादनप्रकाशनाभिरुचिः सुतरां वर्धेतेति लक्ष्यं विघते। एतस्य सम्पादकः डा.मिश्रवर्यः साधुवादैः पुरस्क्रियते।

आरण्यकमिदं उपयुक्तना सर्वेषाम् ऋषिकल्पानां संस्कृतसेवापरायणानां लेखसमीक्षादि-प्रकाशनं कृत्वा तेन व्याजेन तेषां सम्माननं विधातुम् ईहते, किं च स्वत एव तेषां लेखादिभिः इतरेऽपि समुत्सुकाः भवितुमर्हन्ति इति धिया प्रवर्तमानम् अस्ति। एतदर्थम् उत्तमोत्तमान् अप्रकाशितशोधलेखान् संप्रेष्यास्मान् अनुगृह्णन्तु इति तत्रभवन्तः सर्वेऽपि विद्वांसः संप्रार्थ्यन्ते।

गोपबन्धु मिश्र
सम्पादकः

## सूचीपत्रम्


| विषयः | लेखकः | पृष्ठम् |
| --- | --- | --- |
| १. **काशी कथं जीवति** | प्रो. शिवराम शर्मा<br>आचार्यः<br>साहित्यविभागः<br>संस्कृतविद्याधर्मविज्ञानसङ्कायः,<br>काशीहिन्दूविश्वविद्यालयः, वाराणसी | १ |
| २. **प्रातः स्मरणीयः पण्डित ब्रजभूषणमिश्र 'आक्रान्तः'** | डॉ. सुनील कुमार प्रधानः<br>वरीयसंस्कृतशिक्षकः<br>ज्ञाननिकेतनम्, पटना (बिहारः) | ९ |
| ३. **शिवराजविजये गुप्तचर-व्यवस्था** | डॉ. रामेश्वरधारी सिंहः<br>सहायकाचार्यः<br>श्रीवासुदेवसंस्कृतमहाविद्यालयः<br>अकबरपुरम्, अरवलः<br>पटना (बिहारः) | १५ |
| ४. **कालिदासकाव्येषु रसपरिपाकः** | डॉ. मधुबाला सिन्हा<br>वरीयसहायकाचार्या<br>संस्कृतविभागः<br>राजकीयसंस्कृतमहाविद्यालयः<br>काजीपुरम्, पटना (बिहारः) | १९ |





| विषयः | लेखकः | पृष्ठम् |
| --- | --- | --- |
| ५. **उपकार-धर्मदानयोर्भेद-साधारण्ये** | प्रो. हाराल्ड वीसे<br>लाईप्जिस् विश्वविद्यालयः<br>लाईप्जिस् (जर्मनी)<br>University of Leipzig<br>Postfach 920, D-04009 Leipzig, Germani<br>Email:wiese@wifa.uni-leipzige.de | ३३ |


***

# उपकार-धर्मदानयोर्भेदसाधारण्ये

**प्रो.हाराल्ड वीसे**

**प्रबन्धस्याभिप्रायः**

एतस्मिन् मम प्रबन्ध उपदेशद्वयस्य तुलना कर्तव्या। भारतमण्डले धर्मदानोपदेशो रोमकसाम्राज्ये तूपकारशास्त्रम् उपदिष्टम्। ब्राह्मणरचितधर्मशास्त्रेषु प्रधानविषयो धर्मदानम्। लक्ष्मीधरस्य दानकाण्डे[1] देवलेनोक्तम्–

**नाल्पत्वं वा बहुत्वं वा दानस्याभ्युदयावहम्।**
**श्रद्धा शक्तिश्च दानानां वृद्धिक्षयकरे हि ते॥** ( DK 1.3 )

इति धर्मशास्त्रेषु द्विहेतुकधर्मदानम् अवगतम्। अभ्युदयः श्रद्धा च शक्ती आवश्यक्यौ। तावुभौ हेतू मया निर्वक्तव्यौ। एतयोर्निर्वचनं मम प्रबन्धस्य प्रथमोऽभिप्रायः। प्रबन्धस्योपकार–धर्मदानयोस्तुलना द्वितीयोऽभिप्रायः। उपकारशब्दार्थः केनचिद् रोमकेन तर्कविदा व्यादिष्टः। तथा हि–

रोमकसाम्राज्ये पुराणकाले ईसवीपूर्वप्रथमशताब्दे सेनेकनामको (Seneca)[3] महान् विद्वानासीत्। स चोपकारविषय (de beneficiis )[4] इति शास्त्रस्यान्यासां च तर्कविद्यानां प्रसिद्धः प्रवक्ता। अस्मिन् उपकारशास्त्रे महामनास्तर्कविद् आह–

न करणदानद्वयम् उपकारलक्षणं किन्तु ददतश्च कुर्वतश्च विधित्सैव।

विधित्सेत्यनुजिघृक्षा। यद्यन्योऽन्यस्योपकारकस्तर्हि मित्रं मित्रायोपकारे वर्तते। स मैत्र्यसम्बन्धः साहचर्यसम्बन्धो वा भवति। आदातुः प्रतिदानं प्रत्युपकारो वा नावश्यकः। किन्त्वादातृकृतज्ञत्वमावश्यकमिति सेनेकेन प्रोक्तम्।

उपकार-धर्मदानयोः साधारण्यानि सन्ति। भेदा अपि सन्ति। तस्मिन् प्रसङ्गे वक्ष्यामि।



लक्ष्मीधरकृते दानकाण्डे-

**दानस्वरूपमाचष्टे देयादेयविवेचनम्।**
**पात्राणां लक्षणं सम्यग् महादानानि षोडश।** ( DK 0.2 )

इति पठामः। अर्थानां सद्ग्रहीतृषु श्रद्धया शक्तितश्च देयमिति धर्मदानस्वरूपम्। देयादेयविषया शक्तिः। पात्रमिति सद्ग्रहीता। मयाधुनार्थदान-धर्मदान-उपकार-भेदाः श्रद्धा शक्तिः पात्रं साहचर्यं चेति पृथग्विषयाः कथयिष्यन्ते।

**2. नार्थदानं धर्मदानम्, नार्थदानम् उपकारः**

यद्विक्रेता क्रेत्रे ददाति तदर्थदानमुच्यते दानग्रहणं वा। ददामि ददासि यथेति[5] विक्रेतृगणनम्। ततो देवलेन

**पात्रेभ्यो दीयते नित्यमनपेक्ष्य प्रयोजनम्।**
**केवलं त्यागबुद्ध्या यद्धर्मदानं तदुच्यते॥**
**प्रयोजनमपेक्ष्यैव प्रसङ्गाद्यत्प्रदीयते।**
**तदर्थदानमित्याहुरैहिकं फलहेतुकम्॥** ( DK 1.5-6 )

इत्यर्थदानधर्मदानभेद उक्तः। लौकिकप्रयोजनं फलहेतुकमर्थदानम्। अफलहेतुकं लौकिकप्रयोजनवर्जं पुण्यप्रयोजनं धर्मदानम्।

यथार्थदानं न धर्मदानं तथार्थदानं नोपकारः। नेरोगुरुरोमकतर्कविदाह–

'उपकारणां सहजतया गणनं भवति। किंचिदुपकारिणा दत्तम्। यद्यादात्रा किंचित् प्रतिदत्तं भवेत्तर्हि दाता फलमाप्नोति। यद्यादात्रा न किंचित् प्रतिदत्तं भवेत्तर्ह्यर्थलोपो न भवेत्। अहमदो वस्तु दानार्थम् एवाददामित्युपकारकश्चिन्तयति।' इति। अत्रोपकार-धर्मदान-साधारण्यं प्रतिवीक्ष्यताम्। दानार्थमेवेति च ( DK 1.2.3 ) केवलं त्यागबुद्ध्येति च ( DK 1.5 ) संगच्छतः।

**3. श्रद्धाशब्दस्य प्रथमोऽर्थः**

श्रद्धया दद्यादिति धर्मशास्त्रेषूच्यते। द्व्यर्था श्रद्धा।[6] श्रद्धानाम प्रमोदमहात्यागबुद्धिरिति प्रथमोऽर्थः। श्रद्धानाम दानपुण्यलाभनिश्चय इति द्वितीयोऽर्थः।[7] श्रद्धाशब्दार्थस्य प्रथमोऽर्थ इत्थमनूद्यते–

**सौमुख्याद्यभिसंप्रीतिरर्थिनां दर्शने सदा।**
**सत्कृतिश्चानसूया च तदा श्रद्धेति कीर्त्यते॥** ( DK 1.14 )

प्रमोदी सुखमुखो धर्मदाता सत्कारानसूयाभ्यां दद्यादिति धर्मविद्भिरुच्यते। तथा रोमकतर्कवित् 'योऽभिमानेनोपकारमवाक्षिपत् क्रोधेन वाभ्यनुदत् श्रमेण वा पीडननिवारणार्थमददात्तस्मिन्नरे कः कृतज्ञो भवेत्?'

इति पृच्छति। अभिमानात् क्रोधाच्छ्रमाद् वा कृतघ्नत्वं सम्भवति। ततः प्रमोदी सुखमुख उपकारको दद्यादिति रोमकधर्मविद्भिरपि प्रार्थ्यते।

### 4. शक्तिः

याज्ञवल्क्यस्मृतौ

**स्वकुटुम्बाविरोधेन देयं दारसुतादृते।**
**नान्वये सति सर्वस्वं यच्चान्यस्मै प्रतिश्रुतम्॥** ( DK 2.5 )

इत्युक्तम्। सुपुण्यदं धर्मदानम् अत्र न संशयः। किन्तु दानात्ययो नास्ति। स्वकुले दुःखजीविनि स्वजनविरोधपरजनदानं धर्मप्रतिरूपको मिथ्याचार इति मानवधर्मशास्त्रम्। ततः परं भार्या पुत्राः पुत्र्यो वा न देयाः। यद्यन्वयः कुलोऽस्ति तर्हि किंचित् केवलं देयं न सर्वस्वम्। अन्ततो न्यासनिक्षेपादयोऽनर्हद्भ्यो न देयाः। शक्तितो दद्यादिति धर्मशास्त्रविधिः। रोमकपण्डितेनापि

'स्वशक्यत्वशक्तयश्चिन्त्यन्ताम्। यच्छक्नुमस्तत् करवाम। नोत्तरं न्यूनं वा।'

इति अनूद्यते। शक्तिविषये अप्युपकार–धर्मदान–साधारण्यम्।

### 5. पात्रम्

बहव उपकारदोषाः सन्त्यपात्रवरणं विशेषत इति रोमकतत्त्ववित् प्राह।[८]

'यथा बीजानि क्लान्तारण्यभूम्यां न वपामस्तथर्णदानार्थम् ऋणिकधनचरिते प्रयत्नेन परीक्षामहे। उपकारान्तु विना प्रयत्नमवक्षिपाम एव। न सम्यग् दद्मः।'

इत्याचारतार्किक ऋणोपकारतुलनां करोति। तथा धर्मविद्भिः सुपात्राणि बहुशः शंसितानि।

**विद्यायुक्तो धर्मशीलः प्रशान्तः क्षान्तो दान्तः सत्यवादी कृतज्ञः।**
**वृत्तिग्लानो गोहितो गोशरण्यो दाता यज्वा ब्राह्मणः पात्रमाहुः॥** ( DK 3.7 )

इति यमेन प्रोक्तम्।

**किंचिद्वेदमयं पात्रं किंचित्पात्रं तपोमयम्।**
**पात्राणामपि तत्पात्रं शूद्रान्नं यस्य नोदरे॥** ( DK 3.14 )



इति वसिष्ठेन प्रतिपादितम्। महाभारते–

**साङ्गास्तु चतुरो वेदान्योऽधीते वै द्विजर्षभः।**
**षड्भ्योऽनिवृत्तः कर्मभ्यस्तं पात्रमृषयो विदुः॥** ( DK 3.13 )

इति। एतस्मिञ्श्लोके अध्ययनाध्यापनयजनयाजनदानप्रतिग्रहा इति ब्राह्मणषट्कर्माणि ऊह्यानि। गुरुर्मातापितरौ मित्रं दीन उपकारी वेत्यन्यानि पात्राणि।[९]

### 6. श्रद्धाशब्दस्य द्वितीयोऽर्थः

पुण्यप्रयोजनं धर्मदानम्।[१०] पात्रप्रतिबद्धं दातृपुण्यम्।

**व्यसनापदृणार्थं च कुटुम्बार्थं याचते।**
**एवमन्विष्य दातव्यं सर्वदानेष्वयं विधिः॥**
**मातापितृविहीनं तु संस्कारोद्वाहनादिभिः।**
**यः स्थापयति तस्येह पुण्यसंख्या न विद्यते॥** ( DK 3.63-64 )

इति दक्षेण प्रोक्तम्। व्यसनार्ताय वापत्क्लिष्टाय वर्णिकाय वा धर्मविद् दद्यात्। यश्छेमण्डाय संस्कारोपकारं करोति स महापुण्यं लभते। तथा पात्रवर्णप्रतिबद्धं[११] ब्राह्मणविशेषप्रतिबद्धं[१२] वा पुण्यमस्ति।

किन्तु पुण्यदं वस्तुतो धर्मदानमिति प्रश्नः। दातुर्दानपुण्यश्रद्धास्ति? प्रायश आस्तिक्यबुद्धिः श्रद्धा। धर्मदानविषय एव दानपुण्यनिश्चयः श्रद्धा।[१३] यस्य श्रद्धा पुण्यनिश्चयोऽस्ति स श्रद्धया प्रमोदमहात्यागबुद्ध्या[१४] ददाति। श्रद्धाशब्दस्य द्वितीयोऽर्थः रोमकोपकारधर्मे नास्ति। तथोपकारस्य साहचर्यं ब्राह्मणदानधर्मे नास्ति।

### 7. साहचर्यहेतुक उपकारः

धर्मदानेभ्यः पुण्यं सम्भवति। उपकारेभ्यश्च साहचर्यं सम्भवति मैत्र्यं वा। ब्राह्मणधर्मशास्त्रे पात्रविशेषप्रतिबद्धं दातृपुण्यम्। रोमकोपकारशास्त्रे कृतज्ञत्वप्रतिबद्धमुपकारफलभागः। कृतघ्नत्वपापं त्वनिष्टं भवति।

'तत् पापमेव विश्वजनस्य साहचर्यं भिनत्ति छिनत्ति च। उपकारैः परस्परं ह्युपकृत्य वयमभयं वर्तामहे। केनान्येन? उपकारप्रत्युपकारा एव जीवितं सबलीकुर्वन्ति चाकस्मिकाभिक्रमेभ्यश्च रक्षन्ति। एकत्वेन वयं किं स्याम? भक्ष्यमेव हिंस्रपशूनाम् ...। भीतिमते दृढीकर्तुं बोधसाहचर्ये ददावीश्वरः।' इति सेनेकेन साहचर्यस्य शुभफलानि प्रतिपादितानि।

लौकिकप्रयोजनः फलोपलिप्सो रोमकोपकारधर्म इति चेन् नेति सेनेकः। धर्मत एव उपकारान् कुर्यात्। तथा धर्मतः प्रशान्तः क्षान्तो दान्तः स्यात्। फलवदपि कर्म धर्मत एव सम्पादयामि न फलतः।[15]

अफलोपलिप्सस्तथा ब्राह्मणदानधर्मः। पुण्यप्रयोजनो यद्यपि दानधर्मोऽस्ति तथापि लौकिकफलानि सन्ति। यस्माद् ब्राह्मणा बहुशताब्दान् धर्मदानान्यलभन्त तस्मात् ते शास्त्ररचनाध्ययनाध्यापनानि कर्तुमशक्नुवन्। ततो भारतभूखण्डे पाश्चात्यभूखण्डेऽप्येतानि क्रतुमन्त्यद्भुतरूपाणि विश्वजनसाहचर्यकराणि रमणीयानि शास्त्राणि विश्वजनैः पठितव्यानीति मन्ये।।

## सन्दर्भाः

1. University of Leipzig, Postfach 920] D-04009 Leipzig, Germany, tel. : 49 341 9733 771, e-mail : wiese@wifa.uni-leipzig.de
   मह्यं सदानन्ददासः बहूपकारानकरोत्। तत्कृतेकृतज्ञोऽस्मि।
2. लक्ष्मीधररचितस्य कृत्यकल्पतरुनामनिबन्धस्य दानकाण्डे (DK) दानस्वरूपदेयादेयपात्रापात्रलक्षणादयो वर्णिताः। द्र. David Brick. *Brahmanical Theories of the Gift*. Cambridge (MA) : 2015, p.260| कृत्यकल्पतराविव निबन्धेषु बहूनां प्रवक्तृणां वचनानि यथाविषयं समाहितानि।
3. सेनेको दुष्कीर्तेः नेरोनामासकस्य (Nero) गुरुश्चामात्योऽभवत्। किन्त्वसौ क्रूरशासको गुरुभक्तिं गुरुकृतज्ञत्वं वा नाचरत्।
4. रोनेकरचिते de beneficiis (BEN) इति शास्त्र उपकारस्वरूपकृतज्ञत्वादयो वर्णिताः। द्र. L. Annaeus Seneca. *De clementia, de beneficiis*. Darmstadt: 1999.
5. द्र. रेमकभाषायां do ut des इति quid pro quo इति वा।
6. द्र. Hans-Werbin Kohler. Śrad-dhā in der Vedischen und Altbuddhistischen Literatur. Wiesbaden : 1973.
7. द्र. वर्गम् 6
8. BEN 1.1.2: non eligimus dignos, quibus tribuamus
9. DK 3.80



10. द्र. वर्गम् 2
11. DK 3.60
12. DK 3.60
13. द्र. David Brick, *Brahmanical Theories of the Gift*, p.55.
14. द्र. वर्गम् 3
15. द्र. BEN 4.20.1 : prodest gratum esse : ero tamen gratus, etiam is nocet. (सार्थकं कृतज्ञत्वम्। किन्तु यद्यपि कृतज्ञत्वमनर्थकं भवेत् कृतज्ञस्तथापि स्याम्)

**